# શ્રી રામ રક્ષા સ્તોત્રમ્

ramrakshastotra.co

**ધ્યાનમ્**
ધ્યાયેદાજાનુબાહું ધૃતશર ધનુષં બધ્દ્ પદ્માસનસ્થં
પીતં વાસોવસાનં નવકમલ દળસ્પર્થિ નેત્રં પ્રસન્નમ્ ।
વામાંકારૂઢ સીતામુખ કમલમિલલ્લોચનં નીરદાભં
નાનાલંકાર દીપ્તં દધતમુરુ જટામંડલં રામચંદ્રમ્ ॥

**સ્તોત્રમ્**
ચરિતં રઘુનાથસ્ય શતકોટિ પ્રવિસ્તરમ્ ।
એકૈકમક્ષરં પુંસાં મહાપાતક નાશનમ્ ॥

ધ્યાત્વા નીલોત્પલ શ્યામં રામં રાજીવલોચનમ્ ।
જાનકી લક્ષ્મણોપેતં જટામુકુટ મંડિતમ્ ॥

સાસિતૂણ ધનુર્બાણ પાણિં નક્તં ચરાંતકમ્ ।
સ્વલીલયા જગત્રાતુ માવિર્ભૂતમજં વિભુમ્ ॥

રામરક્ષાં પઠેત્પ્રાજ્ઞઃ પાપઘ્નીં સર્વકામદામ્ ।
શિરો મે રાઘવઃ પાતુ ફાલં (ભાલં) દશરથાત્મજઃ ॥

કૌસલ્યેયો દૃશૌપાતુ વિશ્વામિત્રપ્રિયઃ શૃતી ।
ઘ્રાણં પાતુ મખત્રાતા મુખં સૌમિત્રિવત્સલઃ ॥

જિહ્વાં વિદ્યાનિધિઃ પાતુ કંઠં ભરતવંદિતઃ ।
સ્કંધૌ દિવ્યાયુધઃ પાતુ ભુજૌ ભગ્નેશકાર્મુકઃ ॥

કરૌ સીતાપતિઃ પાતુ હૃદયં જામદગ્ન્યજિત્ ।
મધ્યં પાતુ ખરધ્વંસી નાભિં જાંબવદાશ્રયઃ ॥

સુગ્રીવેશઃ કટિં પાતુ સક્થિની હનુમત્-પ્રભુઃ ।
ઊરૂ રઘૂત્તમઃ પાતુ રક્ષઃકુલ વિનાશકૃત્ ॥

જાનુની સેતુકૃત્-પાતુ જંઘે દશમુખાંતકઃ ।
પાદૌ વિભીષણશ્રીદઃ પાતુ રામોઽખિલં વપુઃ ॥

એતાં રામબલોપેતાં રક્ષાં યઃ સુકૃતી પઠેત્ ।
સ ચિરાયુઃ સુખી પુત્રી વિજયી વિનયી ભવેત્ ॥

પાતાળ-ભૂતલ-વ્યોમ-ચારિણ-શ્ચદ્મ-ચારિણઃ ।
ન દ્રષ્ટુમપિ શક્તાસ્તે રક્ષિતં રામનામભિઃ ॥

રામેતિ રામભદ્રેતિ રામચંદ્રેતિ વા સ્મરન્ ।
નરો ન લિપ્યતે પાપૈર્ભુક્તિં મુક્તિં ચ વિંદતિ ॥

જગજ્જૈત્રૈક મંત્રેણ રામનામ્નાભિ રક્ષિતમ્ ।
યઃ કંઠે ધારયેત્તસ્ય કરસ્થાઃ સર્વસિદ્ધ્યઃ ॥

વજ્રપંજર નામેદં યો રામકવચં સ્મરેત્ ।
અવ્યાહતાજ્ઞઃ સર્વત્ર લભતે જયમંગળમ્ ॥

આદિષ્ટવાન્-યથા સ્વપ્ને રામરક્ષામિમાં હરઃ ।
તથા લિખિતવાન્-પ્રાતઃ પ્રબુદ્ધૌ બુધકૌશિકઃ ॥

આરામઃ કલ્પવૃક્ષાણાં વિરામઃ સકલાપદામ્ ।
અભિરામ-સ્ત્રિલોકાનાં રામઃ શ્રીમાન્ સ નઃ પ્રભુઃ ॥

તરુણૌ રૂપસંપન્નૌ સુકુમારૌ મહાબલૌ ।
પુંડરીક વિશાલાક્ષૌ ચીરકૃષ્ણાજિનાંબરૌ ॥

ફલમૂલાશિનૌ દાંતૌ તાપસૌ બ્રહ્મચારિણૌ ।
પુત્રૌ દશરથસ્યૈતૌ ભ્રાતરૌ રામલક્ષ્મણૌ ॥

શરણ્યૌ સર્વસત્ત્વાનાં શ્રેષ્ઠૌ સર્વધનુષ્મતામ્ ।
રક્ષઃકુલ નિહંતારૌ ત્રાયેતાં નો રઘૂત્તમૌ ॥

આત્ત સજ્ય ધનુષા વિષુસ્પૃશા વક્ષયાશુગ નિષંગ સંગિનૌ ।
રક્ષણાય મમ રામલક્ષણાવગ્રતઃ પથિ સદૈવ ગચ્છતામ્ ॥

સન્નદ્ધઃ કવચી ખડ્ગી ચાપબાણધરો યુવા ।
ગચ્છન્ મનોરથાન્નશ્ચ (મનોરથોઽસ્માકં) રામઃ પાતુ સ લક્ષ્મણઃ ॥

રામો દાશરથિ શ્શૂરો લક્ષ્મણાનુચરો બલી ।
કાકુત્સઃ પુરુષઃ પૂર્ણઃ કૌસલ્યેયો રઘૂત્તમઃ ॥

વેદાંતવેદ્યો યજ્ઞેશઃ પુરાણ પુરુષોત્તમઃ ।
જાનકીવલ્લભઃ શ્રીમાનપ્રમેય પરાક્રમઃ ॥

ઇત્યેતાનિ જપેન્નિત્યં મદ્ભક્તઃ શ્રદ્ધયાન્વિતઃ ।
અશ્વમેધાધિકં પુણ્યં સંપ્રાપ્નોતિ ન સંશયઃ ॥

રામં દૂર્વાદળ શ્યામં પદ્માક્ષં પીતવાસસમ્ ।
સ્તુવંતિ નાભિ-ર્દિવ્યૈ-ર્નતે સંસારિણો નરાઃ ॥

રામં લક્ષ્મણ પૂર્વજં રઘુવરં સીતાપતિં સુંદરમ્
કાકુત્સ્થં કરુણાર્ણવં ગુણનિધિં વિપ્રપ્રિયં ધાર્મિકમ્ ।
રાજેંદ્રં સત્યસંધં દશરથતનયં શ્યામલં શાંતમૂર્તિમ્
વંદે લોકાભિરામં રઘુકુલ તિલકં રાઘવં રાવણારિમ્ ॥

રામાય રામભદ્રાય રામચંદ્રાય વેધસે ।
રઘુનાથાય નાથાય સીતાયાઃ પતયે નમઃ ॥

શ્રીરામ રામ રઘુનંદન રામ રામ
શ્રીરામ રામ ભરતાગ્રજ રામ રામ ।
શ્રીરામ રામ રણકર્કશ રામ રામ
શ્રીરામ રામ શરણં ભવ રામ રામ ॥

શ્રીરામ ચંદ્ર ચરણૌ મનસા સ્મરામિ
શ્રીરામ ચંદ્ર ચરણૌ વચસા ગૃહ્ણામિ ।
શ્રીરામ ચંદ્ર ચરણૌ શિરસા નમામિ
શ્રીરામ ચંદ્ર ચરણૌ શરણં પ્રપદ્યે ॥

માતા રામો મત્-પિતા રામચંદ્રઃ
સ્વામી રામો મત્-સખા રામચંદ્રઃ ।
સર્વસ્વં મે રામચંદ્રો દયાળુઃ
નાન્યં જાને નૈવ જાને ન જાને ॥

દક્ષિણે લક્ષ્મણો યસ્ય વામે ચ (તુ) જનકાત્મજા ।
પુરતો મારુતિર્યસ્ય તં વંદે રઘુનંદનમ્ ॥

લોકાભિરામં રણરંગધીરં
રાજીવનેત્રં રઘુવંશનાથમ્ ।
કારુણ્યરૂપં કરુણાકરં તં
શ્રીરામચંદ્રં શરણ્યં પ્રપદ્યે ॥

મનોજવં મારુત તુલ્ય વેગં
જિતેંદ્રિયં બુદ્ધિમતાં વરિષ્ટમ્ ।
વાતાત્મજં વાનરયૂથ મુખ્યં
શ્રીરામદૂતં શરણં પ્રપદ્યે ॥

કૂજંતં રામરામેતિ મધુરં મધુરાક્ષરમ્ ।
આરુહ્યકવિતા શાખાં વંદે વાલ્મીકિ કોકિલમ્ ॥

આપદામપહર્તારં દાતારં સર્વસંપદામ્ ।
લોકાભિરામં શ્રીરામં ભૂયોભૂયો નમામ્યહમ્ ॥

ભર્જનં ભવબીજાનામર્જનં સુખસંપદામ્ ।
તર્જનં યમદૂતાનાં રામ રામેતિ ગર્જનમ્ ॥

રામો રાજમણિઃ સદા વિજયતે રામં રમેશં ભજે
રામેણાભિહતા નિશાચરચમૂ રામાય તસ્મૈ નમઃ ।
રામાન્નાસ્તિ પરાયણં પરતરં રામસ્ય દાસોસ્મ્યહં
રામે ચિત્તલયઃ સદા ભવતુ મે ભો રામ મામુદ્ધર ॥

શ્રીરામ રામ રામેતિ રમે રામે મનોરમે ।
સહસ્રનામ તત્તુલ્યં રામ નામ વરાનને ॥

॥ ઇતિ શ્રીબુધકૌશિકમુનિ વિરચિતં શ્રીરામ રક્ષાસ્તોત્રં સંપૂર્ણમ્ ॥

ramrakshastotra.co